# Shri Dharmika Stotram

# श्रीधार्मिकस्तोत्रम्

## Document Information

Text title : Shri Dharmika Stotram

File name : dhArmikastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, stotra

Location : doc_vishhnu

Author : shatAnandamuni

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीधार्मिकस्तोत्रम्

(वसन्ततिलका वृत्तम्)
श्रीवासुदेव-विमलामृत-धामवासं
नारायणं नरकतारण-नामधेयम् ।
श्यामं सितं द्विभुजमेव चतुर्भुजं च
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ १॥

शिक्षार्थमत्र निजभक्तिमतां नराणां
एकान्त-धर्ममखिलं परिशीलयन्तम् ।
अष्टाङ्गयोग-कलनाश्च महाव्रतानि
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ २॥

श्वासेन साक-मनुलोम-विलोमवृत्त्या
स्वान्तर्बहिश्च भगवत्युरुधा निजस्य ।
पूरे गतागत-जलाम्बुधिनोपमेयं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ३॥

बाह्यान्तरिन्द्रियगण-श्वसनाधिदैव-
वृत्युद्भव-स्थितिलयानपि जायमानान् ।
स्थित्वा ततः स्वमहसा पृथगीक्षमाणं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ४॥

मायामया-कृतितमोऽशुभवासनानां
कर्तुं निषेधमुरुधा-भगवत्स्वरूपे ।
निर्बीज-साङ्ख्यमत-योगग-युक्तिभाजं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ५॥

दिव्याकृतित्व-सुमहस् त्वसुवासनानां
सम्यग्विधिं प्रथयितुं च पतौ रमायाः ।
सालम्बसाङ्ख्यपथ-योगसुयुक्तिभाजं

त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ६॥

कामार्त्त-तस्कर-नटव्यसनि-द्विषन्तः
स्वस्वार्थ-सिद्धिमिव चेतसि नित्यमेव ।
नारायणं परमयैव मुदा स्मरन्तं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ७॥

साध्वी-चकोर-शलभास्तिमि-कालकण्ठ-
कोका निजेष्टविषयेषु यथैव लग्नाः ।
मूर्तौ तथा भगवतोऽत्र मुदातिलग्नं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ८॥

स्नेहातुरस्त्वथ भयातुर आमयावी
यद्वत् क्षुधातुरजनश्च विहाय मानम् ।
दैन्यं भजेयुरिह सत्सु तथा चरन्तं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ९॥

धर्मस्थितै-रुपगतैर्बृहता निजैक्यं
सेव्यो हरिः सितमहःस्थितदिव्यमूर्तिः ।
शब्दाद्यरागिभिरिति स्वमतं वदन्तं
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ १०॥

सद्ग्रन्थनित्य-पठनश्रवणादि-सक्तं
ब्राह्मीं च सत्सदसि शासतमत्र विद्याम् ।
संसारजाल-पतिताखिल-जीवबन्धो
त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥ ११॥

इति श्रीशतानन्दमुनिविरचितं श्रीधार्मिकस्तोत्रं सम्पूर्णम् ।

*Shri Dharmika Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*